दन्तधावनः, पुं, (धावयत्यनेनेति । धावि+ल्युट् । दन्तानां धावनः ।) खदिरवृक्षः । गुच्छकरञ्जः । इति राजनिर्घण्टः ॥ वकुलः । इति शब्दचन्द्रिका ॥

दन्तपत्रं, क्ली, ( दन्ता इव पत्राणि यस्य । ) कुन्दकुसुमम् । इति शब्दरत्नावली ॥ ( यथा कुमारे । ७ । २३ ।
"कर्णार्पितलाभमलदन्तपत्रं
माता तदीयं मुखमुन्नमय्य ॥")

दन्तपत्रकं, क्ली, (दन्त इव शुभ्रं पत्रं दलं यस्य । कप् । ) कुन्दपुष्पम् । इति शब्दचन्द्रिका ॥

दन्तपुष्पं, क्ली, (दन्त इव शुभ्रं पुष्पमस्य ।) कतकफलम् । इति शब्दचन्द्रिका ॥

दन्तफलं, क्ली, ( दन्त इव शुक्लं फलमस्य । ) कतकम् । इति शब्दचन्द्रिका ॥

दन्तफलः, पुं, (दन्त इव शुक्लं फलमस्य ।) कपित्थः । इति राजनिर्घण्टः ॥

दन्तफला, स्त्री, ( दन्तवत् शुभ्रं फलं यस्याः । टाप् । ) पिप्पली । इति राजनिर्घण्टः ॥

दन्तभागः, पुं, ( दन्तसहितो भागः । शाकपार्थिवादिवत् समासः । ) गजाग्रभागः । गजस्य मुखतः स्कन्धपर्य्यन्तो योऽग्रभागः स दन्तसहितः । इत्यमरभरतौ ॥

दन्तमलं, क्ली, ( दन्तलग्नं दन्तस्य वा मलम् । ) दन्तलग्नक्लेदः । तत्पर्य्यायः । पुप्पिका २ । इति हारावली । १६५ ॥

दन्तमूलिका, स्त्री, ( दन्त इव शुक्लं मूलमस्याः । कप्+टापि अत इत्वञ्च । ) दन्तीवृक्षः । इति शब्दरत्नावली ॥

दन्तरोगः, पुं, ( दन्तस्य रोगः । ) रदनामयः । तन्निदानादि दन्तशब्दे द्रष्टव्यम् । तस्यौषधं यथा,
"काकजङ्घाशिग्रुमूले मुखेन विधृते शिव ! ।
चर्व्विता दन्तरोगाणां विनाशो हि भवेद्धर ! ॥"
दन्तरोगाणामित्यत्र दन्तकीटानामिति पुस्तकान्तरे पाठः ॥ इति गारुडे १८६ अध्यायः ॥
अपि च गारुडे १६८ अध्याये ।
"गुच्छमूलकशुण्ठीनां क्षारो हिङ्गुश्च नागरम् ।
शतपुष्पी वचा कुष्ठं दारु शिग्रु रसाञ्जनम् ॥
सौवर्च्चलं यवक्षारं सासन्नं सैन्धवं तथा ।
भुजग्रन्थि विड़ं मुस्तं मधु शुक्तं चतुर्गुणम् ॥
मातुलुङ्गरसञ्चैव कदलीरसमेव च ।
तैलमेभिर्विपक्तव्यं कर्णशूलापहं परम् ।
वाधिर्य्यं कर्णनादञ्च पूयस्रावञ्च दारुणः ।
पूरणादस्य तैलस्य क्रमशः कर्णयोः खिलाः ॥
क्षिप्रं विनाशमायान्ति शशाङ्ककृतशेखर ! ।
क्षारतैलमिदं श्रेष्ठं मुखदन्तामयापहम् ॥"
अन्यच्च ।
"तैलं लाक्षारसं क्षीरं पृथक् प्रस्थमितं पचेत् ।
द्रव्यैः पलमितैरेतैः क्वाथैश्चापि चतुर्गुणैः ॥
लोध्रकट्फलमञ्जिष्ठापद्मकेशरपद्मकैः ।
चन्दनोत्पलयष्ट्याह्वैस्तत्तैलं वदने धृतम् ॥
दालनं दन्तचालञ्च दन्तमोचं कपालिकाम् ।
शीतादं पूतिवक्त्रञ्च विरुचिं विरसास्यताम् ॥
हन्यादाशु गदानेतान् कुर्य्याद्दन्तानपि स्थिरान् ।
लाक्षादिकमिदं तैलं दन्तरोगेषु पूजितम् ॥
इति लाक्षाद्यं तैलम् ।
जयेद्विस्रावणैः स्विन्नमचलं कृमिदन्तकम् ।
तथा च पीतैर्व्वातघ्नैः स्नेहगण्डूषधारणैः ॥
भद्रदार्व्वादिवर्षाभूलेपैः स्निग्धैश्च भोजनैः ।
कृमिदन्तापहं कोष्णं हिङ्गु दन्तान्तरे स्थितम् ॥
बृहतीभूमिकदम्बीपञ्चाङ्गुलकण्टकारिकाक्वाथः ।
गण्डूषस्तैलयुतः कृमिदन्तकवेदनाशमकः ॥
नीली वायसजङ्घा कटुतुम्बीमूलमेकैकम् ।
संचूर्ण्य दशनविधृतं दशनकृमिपातनं प्राहुः ॥
स्नेहानां कवलाः कोष्णाः सर्पिषस्त्रैवृतस्य च ।
निर्यूहाश्चानिलघ्नानां दन्तहर्षप्रमर्दनाः ॥
त्रैवृतस्य सर्पिषः त्रिवृता पक्वस्य सर्पिषः कवल इत्यर्थः ।
स्नैहिकोऽत्र हितो धूमो नस्यं स्नैहिकमेव च ।
पेया रसयवागूश्च क्षीरसन्तानिकाघृतम् ॥
शिरोवस्तिर्हितश्चापि क्रमो यश्चानिलापहः ।
अत्र दन्तहर्षे ।
अच्छिद्रदन्तमूलानि शर्करासुद्धरेद्भिषक् ।
लाक्षाचूर्णैर्म्मधुयुतैस्ततस्तान् प्रतिसारयेत् ॥
दन्तहर्षक्रियां चात्र कुर्य्यान्निरवशेषतः ।
कपालिका कृच्छ्रतमा तत्राप्येषा क्रिया हिता ॥
अत्र दन्तशर्करायाम् । एषा क्रिया दन्तहर्षक्रिया ।
फलान्यम्लानि शीताम्बु रूक्षान्नं दन्तधावनम् ।
तथातिकठिनं भक्ष्यं दन्तरोगी विवर्ज्जयेत् ॥"
इति भावप्रकाशः ॥

दन्तवस्त्रं, क्ली, (दन्तानां वस्त्रमिवाच्छादकत्वात् ।) ओष्ठः । इति हेमचन्द्रः । ३ । २४५ ॥

दन्तवासाः, [ स् ] पुं, ( दन्तस्य वासो वस्त्रमिवावरकत्वात् । ) ओष्ठः । इति त्रिकाण्डशेषः ॥ ( यथा, कुमारे । ५ । ३४ ।
"अपि त्वदावर्ज्जितवारिसम्भृतं
प्रवालमासामनुबन्धि वीरुधाम् ।
चिरोज्झितालक्तकपाटलेन ते
तुलां यदारोहति दन्तवाससा ॥")

दन्तवीजकः, पुं, ( दन्ता इव वीजानि यस्य । ततः स्वार्थे कन् । ) दाड़िमः । इति राजनिर्घण्टः ॥

दन्तशटः, पुं, (दन्तेषु शट इव ग्लानिजनकत्वात् ।) दन्तशठः । इत्यमरटीकायां मथुरानाथः ॥

दन्तशठः, पुं, ( दन्तेषु शठ इव ग्लानिकारकत्वात् । ) जम्बीरः । कपित्थः । कर्म्मरङ्गः । नागरङ्गः । इति मेदिनी । ठे, १६ ॥ ( यथा, सुश्रुते । १ । ४६ ।
"ऐरावतं दन्तशठमम्लं शोणितपित्तकृत् ॥" )
अम्लः । इति हेमचन्द्रः । ६ । २४ ॥

दन्तशठा, स्त्री, ( दन्तेषु शठा । ) चाङ्गेरी । इति मेदिनी । ठे, १६ ॥ ( यथा, भावप्रकाशे ।
"चाङ्गेरी चुक्रिका दन्तशठाम्बष्ठाम्ललोणिका ॥")
क्षुद्राम्लिका । इति राजनिर्घण्टः ॥

दन्तशर्करा, स्त्री, ( दन्तस्य शर्करेव । ) दन्तरोगविशेषः । कफवायुशोषितदन्तगतमलम् । पाथुरि इति भाषा ॥ (तस्य लक्षणं यथाह माधवकरः ।
"मलो दन्तगतो यस्तु कफमारुतशोषितः ।
शर्करेव खरस्पर्शा सा ज्ञेया दन्तशर्करा ॥"
यथा च सुश्रुते निदानस्थाने १६ अध्याये ।
"शर्करेव स्थिरीभूतो मलो दन्तेषु यस्य वै ।
सा दन्तानां गुणहरी तु विज्ञेया दन्तशर्करा ॥")
तस्यौषधम् यथा,—
"गोरचककर्कटीमूलं पिष्टं वास्त्वोदकेन च ।
पीतं दिनत्रयेणैव नाशयेत् दन्तशर्कराम् ॥"
इति गारुडे १६० अध्यायः ॥

दन्तशाणः, पुं, ( दन्तानां शाण इव । चिक्कणताजनकत्वात् । ) मिस्सकद्रव्यम् । इति त्रिकाण्डशेषः । मिषि इति भाषा ॥

दन्तशिरा, स्त्री, ( दन्तानां शिरा यत्र । ) माड़ी । इति शब्दरत्नावली ॥

दन्तशूलः, पुं, ( दन्तस्य शूल इव । शूलवेधनवद्वेदनादायकत्वात् ।) दशनवेदना । तस्यौषधम् ॥ यथा,—
"त्रिफलानिम्बयष्ट्याह्वं कटुकारग्वधैः शृतम् ।
पाययेन्मधुना मिश्रं दन्तशूलोपशान्तये ॥"
इति गारुडे १७४ अध्यायः ॥

दन्तहर्षः, पुं, ( दन्तानां हर्षो यस्मात् । ) दन्तरोगविशेषः । इति माधवकरः ॥ (अस्य लक्षणं यथा, सुश्रुते निदानस्थाने १६ अध्याये ।
"दशनाः शीतमुष्णञ्च सहन्ते स्पर्शनं न च ।
यस्य तं दन्तहर्षन्तु व्याधिं विद्यात् समीरणात् ॥"
दन्तग्लानिः । यथा,—
"यस्य वै जातमात्रस्य हृदयं पीड्यते भृशम् ।
जायते दन्तहर्षश्च तं गतायुषमादिशेत् ॥"
इति वायुपुराणम् ॥)

दन्तहर्षकः, पुं, ( दन्तान् हर्षयतीति । हृष+णिच्+ण्वुल् । ) जम्बीरः । इति जटाधरः ॥

दन्तहर्षणः, पुं, ( दन्तान् हर्षयतीति । हृष+णिच्+ल्युः । ) जम्बीरः । इति त्रिकाण्डशेषः ॥

दन्ताघातः, पुं, ( दन्तानाहन्तीति । आ+हन+अण् । ) निम्बूकः । इति राजनिर्घण्टः ॥ दशनाघातः । ( यथा, गणेशध्याने ।
"दन्ताघातविदारितारिरुधिरैः सिन्दूरशोभाकरम् ॥" )
रतिक्रीड़ायां तस्य स्थानानि दन्तशब्दे द्रष्टव्यानि ॥

दन्तार्व्वुदं, क्ली, पुं, ( दन्तस्य अर्व्वुदमिव । ) दन्तरोगभेदः । तत्पर्य्यायः । दन्तमूलम् २ दन्तशोफः ३ द्विजव्रणः ४ । इति राजनिर्घण्टः ॥

दन्तायुधः, पुं, ( दन्त एव आयुधं यस्य । ) शूकरः । इति त्रिकाण्डशेषः ॥

दन्तालिका, स्त्री, ( दन्तान् अलति मर्य्यादीकरोतीति । अल+ण्वुल् । टापि अत इत्वम् । ) वल्गा । इति त्रिकाण्डशेषः ॥

दन्तावलः, पुं, ( अतिशयितौ दन्तौ अस्य । दन्त+"दन्तशिखात् संज्ञायाम् ।" ५।२।११३।